## अथ द्‌वादशस्तोत्रम

आनन्दमुकुन्द अरविन्दनयन ।
आनन्दतीर्थपरानन्दवरद ॥ १ ॥
सुन्दरीमन्दिर गोविन्द वन्दे ।
आनन्दतीर्थपरानन्दवरद ॥ २ ॥
चन्द्रसुरेन्द्रसुवन्दित वन्दे ।
आनन्दतीर्थपरानन्दवरद ॥ ३ ॥
चन्द्रकमन्दिरनन्दकवन्दे ।
आनन्दतीर्थपरानन्दवरद ॥ ४ ॥
वइन्दारकवइन्दसुवन्दित वन्दे ।
आनन्दतीर्थपरानन्दवरद ॥ ५ ॥
मन्दारसूनसुचर्चित वन्दे ।
आनन्दतीर्थपरानन्दवरद ॥ ६ ॥
इन्दिरानन्दक सुन्दर वन्दे ।
आनन्दतीर्थपरानन्दवरद ॥ ७ ॥
मन्दिरस्यन्दनस्यन्दक वन्दे ।
आनन्दतीर्थपरानन्दवरद ॥ ८ ॥
आनन्दचन्द्रिकास्यन्दक वन्दे ।
आनन्दतीर्थपरानन्दवरद ॥ ९ ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं द्‌वादशस्तोत्रेषु द्‌वादशस्तोत्रं सम्पूर्णं ॥

www.yousigma.com

॥ भारतीरमणमुख्यप्राणान्तर्गत श्रीकइष्णार्पणमस्तु ॥

www.yousigma.com